# ॥ तारायै रामस्य तत्त्वोपदेशः ॥

## श्री-राम उवाच

किं भीरु शोचसि व्यर्थं शोकस्याविषयं पतिम्।
पतिस्तवायं देहो वा जीवो वा वद तत्त्वतः॥ १३॥

पञ्चात्मको जडो देहस्त्वङ्मांसरुधिरास्थिमान्।
कालकर्मगुणोत्पन्नः सोऽप्यास्तेऽद्यापि ते पुरः॥ १४॥

मन्यसे जीवमात्मानं जीवस्तर्हि निरामयः।
न जायते न म्रियते न तिष्ठति न गच्छति॥ १५॥

न स्त्री पुमान्वा षण्ढो वा जीवः सर्वगतोऽव्ययः।
एक एवाद्वितीयोऽयमाकाशवदलेपकः।
नित्यो ज्ञानमयः शुद्धः स कथं शोकमर्हति॥ १६॥

## तारोवाच

देहोऽचित्काष्ठवद्राम जीवो नित्यश्चिदात्मकः।
सुखदुःखादिसम्बन्धः कस्य स्याद्राम मे वद॥ १७॥

## श्री-राम उवाच

अहङ्कारादिसम्बन्धो यावद्देहेन्द्रियैः सह।
संसारस्तावदेव स्यादात्मनस्त्वविवेकिनः॥ १८॥

मिथ्यारोपितसंसारो न स्वयं विनिवर्तते।
विषयान् ध्यायमानस्य स्वप्ने मिथ्यागमो यथा॥ १९॥

अनाद्यविद्यासम्बन्धात्तत्कार्याहङ्कृतेस्तथा ।
संसारोऽपार्थकोऽपि स्याद्रागद्वेषादिसङ्कुलः॥ २०॥

मन एव हि संसारो बन्धश्चैव मनः शुभे।
आत्मा मनःसमानत्वमेत्य तद्गतबन्धभाक्॥ २१ ॥

यथा विशुद्धः स्फटिकोऽलक्तकादिसमीपगः।
तत्तद्वर्णयुगाभाति वस्तुतो नास्ति रञ्जनम्॥ २२ ॥

बुद्धीन्द्रियादिसामीप्यादात्मनः संसृतिर्बलात्।
आत्मा स्वलिङ्गं तु मनः परिगृह्य तदुद्भवान्॥ २३ ॥

कामान् जुषन् गुणैर्बद्धः संसारे वर्ततेऽवशः।
आदौ मनोगुणान् सृष्ट्वा ततः कर्माण्यनेकधा॥ २४ ॥

शुक्ललोहितकृष्णानि गतयस्तत्समानतः।
एवं कर्मवशाज्जीवो भ्रमत्याभूतसम्प्लवम्॥ २५ ॥

सर्वोपसंहृतौ जीवो वासनाभिः स्वकर्मभिः।
अनाद्यविद्यावशगस्तिष्ठत्यभिनिवेशतः ॥ २६ ॥

सृष्टिकाले पुनः पूर्ववासनामानसैः सह।
जायते पुनरप्येवं घटीयन्त्रमिवावशः॥ २७॥

यदा पुण्यविशेषेण लभते सङ्गतिं सताम्।
मद्भक्तानां सुशान्तानां तदा मद्विषया मतिः॥ २८॥

मत्कथाश्रवणे श्रद्धा दुर्लभा जायते ततः।
ततः स्वरूपविज्ञानमनायासेन जायते॥ २९ ॥

तदाऽऽचार्यप्रसादेन वाक्यार्थज्ञानतः क्षणात्।
देहेन्द्रियमनःप्राणाहङ्कृतिभ्यः पृथक् स्थितम्॥ ३० ॥

स्वात्मानुभवतः सत्यमानन्दात्मानमद्वयम्।
ज्ञात्वा सद्यो भवेन्मुक्तः सत्यमेव मयोदितम्॥ ३१ ॥

एवं मयोदितं सम्यगालोचयति योऽनिशम्।
तस्य संसारदुःखानि न स्पृशन्ति कदाचन॥ ३२॥

त्वमप्येतन्मया प्रोक्तमालोचय विशुद्धधीः।
न स्पृश्यसे दुःखजालैः कर्मबन्धाद्विमोक्ष्यसे॥ ३३॥

पूर्वजन्मनि ते सुभ्रु कृता मद्भक्तिरुत्तमा।
अतस्तव विमोक्षाय रूपं मे दर्शितं शुभे॥ ३४॥

ध्यात्वा मद्रूपमनिशमालोचय मयोदितम्।
प्रवाहपतितं कार्यं कुर्वन्त्यपि न लिप्यसे॥ ३५॥

श्रीरामेणोदितं सर्वं श्रुत्वा ताराऽतिविस्मिता।
देहाभिमानजं शोकं त्यक्त्वा नत्वा रघूत्तमम्॥ ३६॥

आत्मानुभवसन्तुष्टा जीवन्मुक्ता बभूव ह।
क्षणसङ्गममात्रेण रामेण परमात्मना॥ ३७॥

अनादिबन्धं निर्धूय मुक्ता साऽपि विकल्मषा।
सुग्रीवोऽपि च तच्छ्रुत्वा रामवक्त्रात् समीरितम्॥ ३८॥

॥ इति श्रीमदध्यात्मरामयणे उमामहेश्वरसंवादे कीष्किन्धाकाण्डे
तृतीये सर्गे तारायै रामस्य तत्त्वोपदेशः॥

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Tara_Tattvopadesha.

generated on **May 9, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits